श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

## श्रीमद्भागवते चतुर्थस्कन्धे

# ॥ श्री पृथु स्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री पृथु स्तुतिः ॥

पृथुरुवाच

वरान्विभो त्वद्वरदेश्वराद् बुधः
    कथं वृणीते गुणविक्रियात्मनाम्।
ये नारकाणामपि सन्ति देहिनां
    तानीश कैवल्यपते वृणे न च ॥ 23 ॥

न कामये नाथ तदप्यहं क्वचिन्
    न यत्र युष्मच्चरणाम्बुजासवः।
महत्तमान्तर्हृदयान्मुखच्युतो
    विधत्स्व कर्णायुतमेष मे वरः ॥ 24 ॥

स उत्तमश्लोक महन्मुखच्युतो
    भवत्पदाम्भोजसुधा कणानिलः।
स्मृतिं पुनर्विस्मृततत्त्ववर्त्मनां
    कुयोगिनां नो वितरत्यलं वरैः ॥ 25 ॥

यशः शिवं सुश्रव आर्यसङ्गमे
    यदृच्छया चोपशृणोति ते सकृत्।
कथं गुणज्ञो विरमेद्विना पशुं
    श्रीर्यत्प्रवव्रे गुणसङ्ग्रहेच्छया ॥ 26 ॥

अथाभजे त्वाखिलपूरुषोत्तमं
    गुणालयं पद्मकरेव लालसः।

अप्यावयोरेकपतिस्पृधोः कलिः
    न स्यात्कृतत्वच्चरणैकतानयोः ॥ 27 ॥

जगज्जनन्यां जगदीश वैशसं
    स्यादेव यत्कर्मणि नः समीहितम्।
करोषि फल्ग्वप्युरु दीनवत्सलः
    स्व एव धिष्ण्येऽभिरतस्य किं तया ॥ 28 ॥

भजन्त्यथ त्वामत एव साधवो
    व्युदस्तमायागुणविभ्रमोदयम्।
भवत्पदानुस्मरणादृते सतां
    निमित्तमन्यद्भगवन्न विद्महे ॥ 29 ॥

मन्ये गिरं ते जगतां विमोहिनीं
    वरं वृणीष्वेति भजन्तमात्थ यत्।
वाचा नु तन्त्या यदि ते जनोऽसितः
    कथं पुनः कर्म करोति मोहितः ॥ 30 ॥

त्वन्माययाद्धा जन ईश खण्डितो
    यदन्यदाशास्त ऋतात्मनोऽबुधः।
यथा चरेद् बालहितं पिता स्वयं
    तथा त्वमेवार्हसि नः समीहितुम् ॥ 31 ॥

॥ इति श्री पृथु स्तुतिः समाप्ता ॥